**Bachelor of Arts (B.A.) Part-I First Semester Examination**

**SANSKRIT (Literature)**

**Optional Paper**

समयः—होरात्रयम्] [पूर्णाङ्काः—80

**सूचना :—**विशेषनिर्देशाभावे उत्तराणि स्वीकृतभाषया लिखत।

## (नीतिशतकम्)

1. भर्तृहरेः मूर्खजनविषयकं मतं सविस्तृतं स्पष्टीकुरुत। 10

**अथवा**

भर्तृहरिणा प्रतिपादितानि सज्जनलक्षणानि विशदीकुरुत।

2. वाक्य**द्वयस्य** ससन्दर्भ स्पष्टीकरणं लिखत : 10

(i) विद्याविहीनः पशुः।

(ii) छायेव मैत्री खलसज्जनाम्।

(iii) एतत् त्रयं जगति पुण्यकृतो लभन्ते।

(iv) तेभ्यो महदभ्यो नमः।

3. (अ) श्लोक**द्वयस्य** सप्रकरणम् अनुवादं कुरुत : 10

(i) यदाऽकिञ्चज्ज्ञोऽहं द्विप इव मदान्धः समभव
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदाकिञ्चित्किञ्चिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः।।

(ii) मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे भवति च तथा दूरतोऽप्प्रगल्भः।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्य।।

(iii) पद्माकरं दिनकरो विकचीकरोति,

चन्द्रो विकासयति कैरवचक्रवालम्।

नाभ्यर्थितो जलधरोऽपि जलं ददाति

सन्तः स्वयं परहितेषु कृताभियोगाः।।

(iv) करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता

मुखेसत्या वाणी विजयिभुजयोर्वीर्यमतुलम्।

हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो,

र्विनाऽप्यैरवर्येण प्रकृतिमहतां मण्डनमिदम्।।

(ब) उपरिनिर्दिष्टेषु श्लोकेषु कमपि एकं वृत्तम् अभिज्ञाय तस्य लक्षणं लिखत। 5

(क) कस्यापि **एकस्य** वृत्तस्य लक्षणं सोदाहरणं लिखत शार्दूलविक्रीडितम् **अथवा** उपजातिः। 5

## (रामायणम्)

4. रामायणस्य धार्मिकम् **अथवा** साहित्यिकं महत्त्वं विशदीकुरुत। 10

5. (अ) उचितपर्यायैः रिक्तस्थानानि पूरयत : 5

(i) रामायणस्य प्रथमकाण्डस्य नाम ———— इति अस्ति।

(सुन्दरकाण्डम्, बालकाण्डम्, अयोध्याकाण्डम्)

(ii) रामसेतुः भारतस्य ———— भागे अस्ति। (पूर्व, पश्चिम, दक्षिण)

(iii) रामायणे हनुमान् आदर्शः ———— इति रूपेण चित्रितः। (भ्राता, सेवकः, बन्धुः)

(iv) जनकः ———— देशस्य राजा आसीत्। (अयोध्या, विदेह, कोसल)

(v) रावणवधस्य प्रसङ्गः रामायणस्य ———— काण्डे अस्ति। (बाल, युद्ध, अयोध्या)

(ब) निम्नलिखितानां पदानाम् अनुरूपं योजयत।

| **अ** | **ब** |
|---|---|
| (1) सुन्दरकाण्डम् | (अ) प्रथमकाण्डम् |
| (2) बालकाण्डम् | (ब) द्वितीयकाण्डम् |
| (3) अयोध्याकाण्डम् | (क) तृतीयकाण्डम् |
| (4) किष्किन्धाकाण्डम् | (ड) चतुर्थकाण्डम् |
| (5) अरण्यकाण्डम् | (ई) पञ्चमकाण्डम्। |

5

## (पुष्पमाला)

6. (अ) उचितैः पर्यायैः रिक्तस्थानानि पूरयत : 5

(i) इयत् महत् सत्त्वं मया ———— कदापि न दृष्टम्। (जगति/जगतः/जगते)

(ii) अस्य स्थानस्य ———— विना हरिद्वारस्य यात्रा निष्फला। (दर्शनाय/दर्शनस्य/दर्शनेन)

(iii) स्मशाने ———— शंकरः तुभ्यं कथं रोचते। (वसन्तः/वसतः/वसन्)

(iv) ———— डॉ. आंबेडकराः सम्मानिताः। (नेहरूमहोदयाः/नेहरूमहोदयैः/नेहरूमहोदयान्)

(v) ———— परितः उपस्थिताः हरिद्वारस्याः पुरोहिताः। (अस्मान्/अस्माकं/अस्माभिः)

(ब) कोष्ठकगत-सूचनानुसारं परिवर्तनं कृत्वा वाक्यानि पुनः लिखत : 5

(i) अहम् आत्मनः पत्नीम् एवं कथयामि। (भविष्यत्कालः)

(ii) राजा रामचन्द्रः आदर्शराज्यं अकरोत्। (परोक्षभूतकाल)

(iii) अस्माभिः तद् दूष्यते नगराणां मलप्रवाहैः। (कर्तरि प्रयोग)

(iv) शंकरः मनसि अचिन्तयत। (कर्तरि भू. धा. विशेषण)

(v) वीरबलेन ईषद् ——— अनुमोदितम्। (हस्-पूर्वकालवाचक अव्यय)

(क) **त्रयाणां** समासविग्रहं कृत्वा तस्य नामानि निर्दिशत : 3

(i) रसिकलालिता।

(ii) गायकगायिकाः।

(iii) वीणाश्रया।

(iv) उपनगरम्।

(v) प्रियापत्यम्।

(ड) **त्रयाणां** सन्धिविग्रहं कुरुत : 3

(i) समग्रमपि।

(ii) गजस्योपरि।

(iii) यन्त्रालयाश्च।

(iv) देवालयेऽपि।

(v) प्रियवादीति।

(इ) निम्नलिखित परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि **संस्कृतेन** लिखत : 4

विदर्भभूमिः सरस्वत्याः जन्मभूमिः इति कथ्यते। विदर्भे नैके संस्कृत साहित्योपासकाः जाताः। तेषु भवभूतिः, राजशेखरः, भारविः च प्रसिद्धाः सन्ति। आधुनिक कालेऽपि विदर्भे नैके संस्कृतरचनाकाराः विख्याताः। तेषु डॉ. श्रीधर-भास्कर-वर्णेकर-महाभागाः आधुनिकमहाकविरूपेण ख्याति प्राप्ताः। तैः विरचितं शिवराज्योदयम' इति महाकाव्यं, शिवराजभिषेकम् इति नाटकं, विवेकानन्दचरितम् इति महानाटकं च इति रचनात्रयम् आधुनिक संस्कृत साहित्ये प्रसिद्धम्। 'प्रज्ञाभारती' इति उपाधिना सम्मानितः महोदयः।

(1) का भूमिः सरस्वतीजन्मभूमिः ?

(2) के संस्कृतसाहित्यिकाः विदर्भे जाताः ?

(3) आधुनिक महाकविरूपेण के ख्यातिप्राप्ताः ?

(4) डॉ. श्री. भा. वणैकरः केन उपाधिना सम्मानितः ?

835 835 835 835 835